# संस्कृत (शेमुषी)

## Class 10 - संस्कृत (शेमुषी)

**निर्धारित समय: 3 hours** **अधिकतम अंक: 80**

**सामान्य निर्देश:**

1. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 18 प्रश्नाः सन्ति।
2. अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।
   ‘क’ खण्ड : अपठितावबोधनम् - 10 अङ्काः
   'ख' खण्ड : रचनात्मककार्यम् - 15 अङ्काः
   ‘ग' खण्ड : अनुप्रयुक्तव्याकरणम् - 25 अङ्काः
   'घ' खण्ड : पठितावबोधनम् - 30 अङ्काः
3. प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।
4. उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः
5. प्रश्नस्य क्रमाङ्कः प्रश्नपत्रानुसारम् एव लेखनीयः।
6. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।
7. प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः।

### 'क' खण्डः अपठितावबोधनम्

1. **अधोलिखितं अनुच्छेदं पठित्वा प्रदत्तप्रश्नानाम् संस्कृतेन उत्तरत। (10)** **[10]**

'रामायणम् इतिहासः, न तु पुराणम्' इति हि भारतीया श्रद्धा। या घटना प्रवृत्ता तां विवृणोति इतिहासः। किन्तु पुराणं तथा न। भक्तिश्रद्धादीनाम् उत्पादनाय कथा कल्पते तत्र। पुराणेषु अपि क्वचित् ऐतिहासिकाः अंशाः समाविष्टाः भवन्ति इति तु अन्यद् एतत्। इतिहासग्रन्थे तु यत् वर्यते तत् समग्र वास्तविकं भवति। वर्णनादिषु कविकल्पना स्यात् चेदपि वृत्तं तु वास्तविकमेव। रामायणमहाभारतयोः ऐतिहासिकताविषये पारम्परिकाणां न सन्देहः कदापि।

किन्तु आधुनिकाः इतिहासपुराणयोः भेदस्य अवगमने (ज्ञातुम्) असमर्थाः सन्ति। येन कथा वयंते विस्तरेण, सः सर्वोऽपि ग्रन्थराशिः पुराणतुल्यः एव इति तेषां मतम् अस्ति। अतः ते रामायणस्य ऐतिहासिकताविषये प्रमाणम् अपेक्षन्ते। तद्विषये मान्येन पुष्कर भटनागर वर्येण कश्चन सफलः प्रयासः कृतः अस्ति। आधुनिकं तन्त्रांशम् (Software) उपयुज्य सः रामायणे वर्णिताः खगोलीयघटनाः वास्तविकाः एव इति सप्रमाणं निरूपितवान् अस्ति।

I. **एकपदेन उत्तरत- (1×2=2)**

i. रामायणम् किम्?

ii. या घटना प्रवृत्ता तां कः विवृणोति?

II. **पूर्णवाक्येन उत्तरत- (2×2=4)**

i. किन्तु आधुनिकाः कस्मिन् असमर्थाः सन्ति?

ii. पुराणेषु का कल्पते?

III. **भाषिककार्यम्- (1×3=3)**

i. 'आधुनिकं तन्त्रांशम्'। अनयोः पदयोः विशेष्यपदं किम्?

(क) आधुनिकम्

(ख) तन्त्रांशम्

(ग) तन्त्रांशः

(घ) आधुनिकः

ii. अनुच्छेदे ‘कल्पते' इति क्रियायाः कर्तृपदं किम्?

(क) उत्पादनाय

(ख) भक्तिश्रद्धादीनाम्

(ग) तत्र

(घ) कथा

iii. 'उपयोगं कृत्वा' अनयोः पदयोः स्थाने कि पदम् अनुच्छेदे प्रयुक्तम्?

(क) उपयुज्य

(ख) अपेक्षन्ते

(ग) उपयोगाय

(घ) प्रयुज्य

IV. **उपरिलिखितस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत। (1×1=1)**

## ‘ख’ खण्डः रचनात्मकं कार्यम्

2. **अग्रज प्रति लिखितम् अधः पत्रं मञ्जूषापदसहायतया पूरयित्वा पुनः लिखत।** **[5]**

(i) __________

दिनाङ्कः __________

(ii) __________

प्रणामाः।

अहमत्र (iii) __________, भवान् अपि तत्र कुशली अस्ति इति मन्ये। मातापितरौ तु सर्वदा त्वां (iv) __________। तवाग्रजा आगामिमासे रक्षाबन्धनपर्वणि गृहम् (v) __________। भवान् अपि (vi) __________ आगच्छतु। अस्मिन् विषये तवाग्रजा अपि त्वां पत्रं (vii) __________। भवतः अध्ययन (viii) __________ चलति इति वयं चिन्तयामः। अन्यत् सर्वं (ix) __________।

सर्वेभ्यः मित्रेभ्यः मदीयाः शुभकामनाः।

भवतः (x) __________

कुलदीपः

| **मञ्जूषा** |
|---|
| लेखिष्यति, दिल्लीतः, कुशली, सम्यक्, प्रिय अग्रज !, आगमिष्यति, कुशलम्, अनुजः, स्मरतः, अवश्यम्। |

3. **इदं चित्रं दृष्ट्वा मञ्जूषायां च प्रदत्तशब्दानाम् सहायतया पञ्चवाक्यानि रचयत- (5)** **[5]**



| |
|---|
| **मञ्जूषा-** रक्तदुर्गस्य, अग्रिमे, ध्वजः, निर्मितः, रक्तः, इतस्ततः, स्मारकाः, जनाः |

4. **अधोलिखितानि वाक्यानि संस्कृतभाषया अनूद्य लिखत - (केवलं वाक्यपश्चकम्)** **[5]**

(i) हम सब संस्कृत पढ़ते हैं। **[1]**

We all study Sanskrit.

(ii) वह बच्चा विद्यालय जाता है। **[1]**
That child is going to school.

(iii) कन्याओं का सम्मान करना चाहिए। **[1]**
Respect the girls.

(iv) हम सब सिनेमा देखते हैं। **[1]**
We all watch movies.

(v) प्रभाकर आज मेरे घर आएगा। **[1]**
Prabhakar will come to my house today.

(vi) एक स्त्री जल के घड़े को लेकर पानी लेने जाती है। **[1]**
A woman goes to fetch water with a pitcher of water.

(vii) वे सब देवालय को गए। **[1]**
They all went to the temple.

## 'ग' खण्डः अनुप्रयुक्तव्याकरणम्

5. **अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कुरुत- (केवलं प्रश्नचतुष्टयम्)** **[4]**

(i) रमणीया हि सृष्टिः + एषा। **[1]**

(ii) शरीरोपचयः कान्तिः + गात्राणां सुविभक्तता। **[1]**

(iii) राज्ञः स्वेषु गात्रेष्वपि निरासक्तिं विज्ञाय ब्रह्माण्डं व्याकुलम् अभवत्। **[1]**

(iv) मातृ + आज्ञा सर्वदा पालनीया। **[1]**

(v) इति + आत्मानम् **[1]**

6. **अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत - (केवलं प्रश्नचतुष्टयम्)** **[4]**

(i) राजहंसेन या शोभा सरसो भवेत्। **[1]**

क) राज्ञः हंसः तेन
ख) राज्ञोः हंसेन
ग) राज्ञे हंसेन न
घ) राजनि हंसेन

(ii) अशान्तानि खलु तान्येव महाविनाशम् उपस्थापयन्ति। **[1]**

क) न शान्तानि मा
ख) नो शान्तानि
ग) नञ् शान्तानि
घ) अनशान्तानि

(iii) अहम् अस्य सर्वं क्रियाकलापं पश्यामि। **[1]**

क) क्रियायाः कलापम्
ख) क्रिया कलापं च
ग) क्रिया च कलापं च तयोः समाहारः
घ) क्रिया च कलापं च

(iv) नगरस्य समीपे एव सा वरयात्रा अतिष्ठत्। [1]

क) उपनगर | ख) उपनगरम्
ग) यथानगरम् | घ) अनुनगरम्

(v) इयमासीत् भैरवविभीषिका कच्छ भूकम्पस्य। [1]

क) भैरवाय विभीषिका कि | ख) भैरवस्य विभीषिका की
ग) भैरव सा विभीषिका | घ) भैरवा च सा विभीषिका

7. **अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत - (केवलं प्रश्नचतुष्टयम्)** **[4]**

(i) परश्वः वयम् ऐतिहासिकस्थलानि द्रष्टुं गमिष्यामः। [1]

क) इतिहास + घञ् | ख) इतिहास + तल्
ग) इतिहास + तट | घ) इतिहास + ठक्

(ii) बालं विलोक्य कुक्कुरः अभाषत्। [1]

क) विलोक् + य | ख) विलोक + ल्यप्
ग) वि + लोग् + ल्यप् | घ) वि + लोक् + ल्यप्

(iii) रामः प्रत्यागत्य तत्र गमिष्यति। [1]

क) प्रत्या + गम् + ल्यप् | ख) प्रति + आ + गम् + ल्यप्
ग) प्रति + आ + गत् + ल्यप् | घ) प्रत्या + गत्य

(iv) अयं सन्दर्भः प्रथमम् अवतीर्णः वसुमतीम्। [1]

क) वसु + तल् | ख) वसु + मतुप्
ग) वसु + तत् | घ) वसु + तवत्

(v) रामानन्दः एकः श्रेष्ठः धर्म + ठक् अस्ति। [1]

क) धार्मिकः | ख) धर्मिक
ग) धर्मठिकः | घ) धर्मिकम्

8. **वाच्यानुसारम् उचितपदैः रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं पुनः लिखत (केवलं प्रश्नत्रयम्)** **[3]**

(i) वृक्षाः फलानि यच्छन्ति। वृक्षैः __________ दीयन्ते। [1]

क) फलान् | ख) फलानी
ग) फलाः | घ) फलानि

(ii) छात्राः तिष्ठन्ति। __________ स्थीयते। [1]

क) छात्रान्　　　　ख) छात्रेण

ग) छात्रया　　　　घ) छात्राभिः

(iii) __________ अधुना गीता पठ्यते। [1]

क) भक्तः　　　　ख) भक्ताः

ग) भक्तेभ्यः　　　　घ) भक्तेन

(iv) सेवकः नृपम् सेवते। __________ नृपः सेव्यते।। [1]

क) सेवकैः　　　　ख) सेवकेन

ग) सेवकाभ्याम्　　　　घ) सेवकाः

9. **अधोलिखितदिनचर्यायां रिक्तस्थानानि कालबोधकशब्दैः पूरयत। (केवलं प्रश्नचतुष्टयम्) (1×4=4)** **[4]**

i. दिव्यांशः प्रातः 8:00 __________ योगं करोति।

ii. रमेशः सायं 4:30 __________ भ्रमणाय गच्छति।

iii. रमा प्रातः 7:15 __________ प्रातराशं करोति।

iv. चन्द्रशेखरः सायं 6:30 __________ व्यायामं करोति।

v. कमलेशः रात्रौ 8:45 __________ पुस्तकं पठति।

10. **अधोलिखितवाक्येषु रिक्तस्थानानि मञ्जूषाप्रदत्तैः उचितैः अव्ययपदैः पूरयत। (केवलं प्रश्नषटकम्) (½×6=3)** **[3]**

**[मञ्जूषा**- कदा, सहसा, वृथा, अपि, तर्हि, श्वः, अद्य, इदानीम्**]**

i. विद्यालये __________ अवकाशः भविष्यति।

ii. __________ रविवासरः अस्ति।

iii. पत्रवाहकः __________ पत्राणि दातुं गच्छति।

iv. यदि मेघ: गर्जति __________ मयूराः नृत्यन्ति।

v. अहम् __________ आंग्लभाषां पठामि।

vi. सा गणितम् __________ पठितुम् इच्छति?

vii. __________ निरीक्षकेन निर्णयः न करणीयः।

viii. त्वम् अत्र __________ श्रमं करोषि।

11. **अधोलिखितवाक्येषु रेखाङ्कित-अशुद्धपदाय उचितपदं चित्वा वाक्यानि पुनः लिखत - (केवलं प्रश्नत्रयम्)** **[3]**

(i) अहं स्वकर्मं सदा निष्ठया करोमि। [1]

क) स्वकर्म　　　　ख) स्वकर्मणा

ग) स्वकर्मणे　　　　घ) स्वकर्मम्

(ii) इमे छात्रौ पठतः। [1]

क) इमौ　　　　ख) इमानि

ग) इमाः　　　　　　घ) इमम्

(iii) <u>अस्य</u> बालिकायाः गृहं कुत्रास्ति? **[1]**

क) अनेन　　　　　　ख) अस्याम्

ग) अस्यैः　　　　　　घ) अस्याः

(iv) उद्यानं <u>पुष्पाणि</u> शोभते। **[1]**

क) पुष्पैः　　　　　　ख) पुष्पाभिः

ग) पुष्पेन　　　　　　घ) पुष्पात्

## 'घ' खण्ड: पठितावबोधनम्

12. **अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत।** **[5]**

"बहुन्यपत्यानि मे सन्तीति सत्यम्। तथाप्यहमेतस्मिन् पुत्रे विशिष्य आत्मवेदनामनुभवामि। यतो हि अयमन्येभ्यो दुर्बलः। सर्वेष्वपत्येषु जननी तुल्यवत्सला एव। तथापि दुर्बले सुते मातुः अभ्यधिका कृपा सहजैव" इति। सुरभिवचनं श्रुत्वा भृशं विस्मितस्याखण्डलस्यापि हृदयमद्रवत्। स च तामेवमसान्त्वयत्-" गच्छ वत्से! सर्वं भद्रं जायेत।" अचिरादेव चण्डवातेन मेघरवैश्च सह प्रवर्षः समजायत। पश्यतः एव सर्वत्र जलोपप्लवः सञ्जातः। कृषकः हर्षतिरिकेण कर्षणाविमुखः सन् वृषभौ नीत्वा गृहमगात्।

I. **एकपदेन उत्तरत-**

i. सर्वेष्वपत्येषु जननी कीदृशी भवति?

ii. कुत्र जलोपप्लवः सञ्जातः?

II. **पूर्णवाक्येन उत्तरत-**

i. कस्य वचनं श्रुत्वा भृश विस्मितस्याखण्डलस्यापि हृदयमद्रवत्?

III. **भाषिककार्यम्-**

i. ‘अनुभवामि' इति क्रियापदस्य कर्तृपदं किम्?
(क) अहम्
(ख) पुत्रः
(ग) एतस्मिन्
(घ) विशिष्य

ii. 'जनकः' इति पदस्य विपर्ययपदं किम्?
(क) पिता
(ख) सत्यम्
(ग) जननी
(घ) दुर्बलः

iii. 'शीघ्रम्' इति पदस्य पर्यायपदं किम् प्रयुक्तम्?
(क) चिरात्
(ख) अचिरात्
(ग) चण्डवात
(घ) प्रवर्षः

13. **अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत।** **[5]**

कज्जलमलिनं धूमं मुञ्चति शतशकटीयानम्।

वाष्पयानमाला संधावति वितरन्ती ध्वानम्।।
यानानां पङ्क्तयो ह्यनन्ताः कठिनं संसरणम्।।

I. **एकपदेन उत्तरत-**

i. के कज्जलमलिनं धूमं मुञ्चति?

ii. वाष्पयानमाला कि कुर्वन्ती संधावति?

II. **पूर्णवाक्येन उत्तरत-**

i. संसरणम् कठिनम् किमर्थम् भवति?

III. **भाषिककार्यम्-**

i. 'शतशकटीयानम्' कर्तृपदस्य क्रियापदं किम्?
(क) धूम्रम्
(ख) कज्जल
(ग) मलिनम्
(घ) मुञ्चति

ii. 'अनंताः' इति पदस्ये विशेष्य पदं किम्?
(क) पक्तयः
(ख) कठिनं
(ग) संसरणम्
(घ) यानानां

iii. 'चलनम्' इति क्रियापदस्य पर्यायपदं किम्?
(क) संसरणम्
(ख) कठिनम्
(ग) ध्वानम्
(घ) यानानाम्

14. **अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत। (5)** **[5]**

प्रजासुखे सुखं राज्ञः, प्रजानां च हिते हितम्।
नात्मप्रियं हितं राज्ञः, प्रजानां तु प्रियं हितम्।।
अपि च-
अगाधजलसञ्चारी न गर्व याति रोहितः।
अङ्गुष्ठोदकमात्रेण शफरी फुर्फुरायते।।
अतः भवन्तः सर्वेऽपि शफरीवत् एकैकस्य गुणस्य चर्चा विहाय मिलित्वा प्रकृतिसौन्दर्याय वनरक्षायै च प्रयतन्ताम्।
सर्वे प्रकृतिमातरं प्रणमन्ति मिलित्वा दृढसंकल्पपूर्वकं च गायन्ति-
प्राणिनां जायते हानिः परस्परविवादतः।
अन्योन्यसहयोगेन लाभस्तेषां प्रजायते।।

I. **एकपदेन उत्तरत-**

i. राज्ञः सुखं कुत्र भवति?

ii. कासां तु प्रियं हितम्?

II. **पूर्णवाक्येन उत्तरत-**

i. कीदृशः रोहितः गर्वं न याति?

III. **भाषिककार्यम्-**

i. 'दुःखम्' इति पदस्य विलोमपदं किं प्रयुक्तम्?
(क) सुखम्
(ख) हितम्
(ग) प्रियम्

ii. 'नृपतेः' इति पदस्य पर्यायपदं किं प्रयुक्तम्?
(क) प्रजायाः
(ख) सुखे
(ग) राज्ञः

iii. 'मत्स्यः' इत्यर्थे अत्र किं पदं प्रयुक्तम्?
(क) शफरी
(ख) मात्रेण
(ग) गर्वम्

15. **रेखाङ्कित-पदानि आधृत्य प्रश्ननिर्माणं कुरुत - (केवलं प्रश्नचतुष्टयम्)** **[4]**

(i) तस्य तनयः छात्रावासे पठति। **[1]**

(ii) अत्र किञ्चिन्निरर्थकम् न अस्ति। **[1]**

(iii) वनस्य समीपे एका नदी वहति। **[1]**

(iv) देउलाख्यो ग्रामे राजसिंह वसतिस्म। **[1]**

(v) कृषकः क्षेत्रकर्षणं कुर्वन् आसीत्। **[1]**

16. **अधोलिखित श्लोकानाम् भावर्थम् मञ्जूषायाः सहायतया उचित-क्रमेण पूरयत्।** **[4]**

काकः कृष्णः पिकः कृष्णः कोः भेदः पिककाकयोः।
वसन्तसमये प्राप्त काकः काकः पिकः पिकः।।

**भावार्थः-** अस्य भावोऽस्ति यत् (i)__________ वर्णः कृष्णः वर्तते पिकस्य अपि वर्णः (ii)__________ एव अस्ति। अतः तयोः पिके काके च कः भेदः अस्ति। अर्थात् वर्ण दृष्ट्या तयोः कश्चिद् भेदा न दृश्यते। परन्तु यदा (iii)__________ समयः आगच्छति तदा तयोः स्वरै ज्ञायते यत् कः (iv)__________ अस्ति कश्च पिकोवर्तते।

| |
|---|
| **मञ्जूषा-** वसन्तस्य, काकस्य, काकः, कृष्णः |

अथवा

**अधोलिखित श्लोकानाम् भावर्थम् मञ्जूषायाः सहायतया उचित-क्रमेण पूरयत्।**

भवति शिशुजनो वयोऽनुरोधाद्
गुणमहतामपि लालनीय एव।
व्रजति हिमकरोऽपि बालभावात्
पशुपति-मस्तक-केतकच्छदत्वम्।।

**भावः-**बालकः स्व स्वाभावात् (i)__________ जनैः अपि तथैव (ii)__________ भवति, यथा केतकी (iii)__________ इव चन्द्रः बालभावत्वेन भगवतः शिवस्य (iv)__________ चुड़ामणि इव शोभते।

| |
|---|
| **मञ्जूषा-** शेखर, लालनीयः, वयोवृद्धैः, पुष्पाणि |

17. **अधोलिखितश्लोकानाम् अन्वयं मञ्जूषायाः उचित पदं चित्वा पूरयत्।** **[4]**

| |
|---|
| **मञ्जूषा-** लाभः, जायते, सहयोगेन, प्राणिनाम्, अगाध, अङ्गुष्ठ, फुर्फुरायते, याति। |

I. अगाधजलसञ्चारी न गर्वं याति रोहितः।
अङ्गुष्ठोदकमात्रेण शफरी फुर्फरायते।।
**अन्वयः-** रोहितः (i) __________ (सन् अपि) गर्वम् न (ii) __________ शफरी (iii) __________ उदकमात्रेण (iv) __________।

II. प्राणिनां जायते हानिः परस्परविवादतः।
अन्योन्यसहयोगेन लाभस्तेषां प्रजायते।।
**अन्वयः-** परस्परविवादतः (i) __________ हानिः (ii) __________ अन्योन्य (iii) __________ तेषाम् (प्राणिनाम्) (iv) __________ प्रजायते।

18. **अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकूलम् उचितार्थं चित्वा लिखत- (केवलं प्रश्नत्रयम्)** **[3]**

(i) प्रबुद्धः अतिथिः चौरशंकया तमन्वधावत्। **[1]**

क) सुप्तः　　ख) जागृतः

ग) मूर्खः　　घ) प्रबलः

(ii) अवक्रता यथाचित्ते तथा वाचि भवेत्। **[1]**

क) मनसि　　ख) शरीरे

ग) मुखे　　घ) वाण्याम्

(iii) यदि त्वं मां मुक्त्वा यासि तदा वेलाप्यवेला स्यात्। **[1]**

क) शीघ्रम　　ख) समयः

ग) प्रातः　　घ) बेल

(iv) गच्छ, गच्छ जम्बुक ! त्वमपि किञ्चिद् गूढप्रदेशम्। **[1]**

क) मण्डूक　　ख) लोमशिका

ग) गजः　　घ) श्रृगाल